तत्राणीता त्वजित-जननी हर्ष-शोकाकुला सा
भिक्षां दत्त्वा कतिपय-दिवा पालयां आस सूनुम् ।
भक्त्या यस्तद्-विधिं अनुसरन् क्षेत्र-यात्रां चकार
तं गौराङ्गं भ्रमण-कुशलं न्यासि-राजं स्मरामि ॥ ३७॥

नित्यानन्दो विबुध-जगदानन्द-दामोदरौ च
लीला-गाने परम-निपुणो दत्त-सूनुर्मुकुन्दः ।
एते भक्ताश्चरण-मधुपा येन सार्धं प्रचेलु-
स्तं गौराङ्गं प्रणत-पटल-प्रेष्ठ-मूर्तिं स्मरामि ॥ ३८॥

त्यक्त्वा गङ्गा-तट-जन-पदांश्चाम्बु-लिङ्गं महेशं
ओढ्रे देशे रमण-विपिने क्षीर-चौरं च वीक्ष्य ।
श्री-गोपालं कटक-नगरे यो ददर्शात्म-रूपं
तं गौराङ्गं स्व-भजन-परं भक्त-मूर्तिं स्मरामि ॥ ३९॥

एकाम्राख्ये पशुपति-वने रुद्र-लिङ्गं प्रणम्य
यातः कपोटक-शिव-पुरं स्वस्य दण्डं विहाय ।
नित्यानन्दस्तु तद्-अवसरे यस्य दण्डं बभञ्ज
तं गौराङ्गं कपट-मनुजं भक्त-भक्तं स्मरामि ॥ ४०॥

भग्ने दण्डे कपट-कुपितस्तान् विहाय स्व-वर्गान्
एको नीलाचल-पति-पुरं प्राप्य तूर्णं प्रभुर्यः ।
भावावेशं परमं अगमत् कृष्ण-रूपं विलोक्य
तं गौराङ्गं पुरट-वपुषं न्यस्त-दण्डं स्मरामि ॥ ४१॥

भावास्वाद-प्रकट-समये सार्वभौमस्य सेवा
तस्यानर्थान् प्रकृति-विपुलान् नाशयां आस सर्वान् ।
तस्माद्यस्य प्रबल-कृपया वैष्णवोऽभूत् स चापि
तं वेदार्थ-प्रचरण-विधौ तत्त्व-मूर्तिं स्मरामि ॥ ४२॥

तत्रोषित्वा कतिपय-दिवा दक्षिणात्यं जगाम
कूर्म-क्षेत्रे गद-विरहितं वासुदेवं चकार ।
रामानन्दे विजय-नगरे प्रेम-सिन्धुं ददौ य-
स्तं गौराङ्गं जन-सुख-करं तीर्थ-मूर्तिं स्मरामि ॥ ४३॥

देशे देशे सुजन-निचये प्रेम विस्तारयन् यो
रङ्ग-क्षेत्रे कतिपय-दिवा भट्ट-पल्यां अवात्सीत् ।

इत्थं लीलामय-वर-वपुः कृष्ण-चैतन्य-चन्द्रो
वर्षान् द्वि-द्वादश-परिमितान् क्षेपयां आस गार्ह्ये ।
सन्न्यासे यः सम-परिमितं यापयां आस कालं
वन्दे गौरं सकल-जगतां आश्रमाणां गुरुं तम् ॥ ९८॥

दरिद्रेभ्यो वस्त्रं धनं अपि ददौ यः करुणया
बुभूक्षून् योऽन्नाद्यैरतिथि-निचयांस्तोषं अनयत् ।
तथा विद्या-दानैः सुखं अतिशयं यः समभजत्
स गौराङ्गः शश्वत्स्मरण-पदवीं गच्छतु मम ॥ ९९॥

सन्न्यासस्य प्रथम-समये तीर्थ-यत्र-च्छलेन
वर्षान् यो वै रस-परिमितान् व्याप्य भक्तिं ततान ।
शेषान् अब्दान् वसु-विधु-मितान् क्षेत्र-देशे स्थितो यो
वन्दे तस्य प्रकट-चरितं योगमाया-बलाढ्यम् ॥ १००॥

ह ह कष्टं सकल-जगतां भक्ति-भाजां विशेषं
गोपीनाथालय-परिसरे कीर्तने यः प्रदोषे ।
अप्राकट्यं बत समभजन् मोहयन् भक्त-नेत्रं
वन्दे तस्याप्रकट-चरितं नित्यं अप्राकृतं तम् ॥ १०१॥

भक्त्या ये वै सकल-समये गौर-गाथां इमां नो
गायन्त्युच्चैर्विगलित-हृदः गौर-तीर्थे विशेषान् ।
तेषां तूर्णं द्विज-कुल-मणिः कृष्ण-चैतन्य-चन्द्रः
प्रेमावेशं युगल-भजने यच्छति प्राण-बन्धुः ॥ १०२॥

षट्-ख-वेद-समासेन कार्त्तिके गोद्रुमे प्रभोः ।
गीता भक्तिविनोदेन लिलेयं लोक-पावनी ॥ १०३॥

यत्-प्रेम-माधुर्य-विलास-रागान्
नन्दात्मजो गौड-विहारं आप ।
तस्यै विचित्रा वृषभानु-पुत्र्यै
लीला मया तस्य समर्पितेयम् ॥ १०४॥

इति श्रीमत्-सच्चिदानन्द-भक्तिविनोद-ठक्कुर-विरचितं
श्री-गौराङ्ग-लीला-स्मरण-मङ्गल-स्तोत्रं समाप्तम् ॥

